# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| कक्षा - शास्त्री (SEM-5) | प्रश्नपत्रम् – ८ | |
|---|---|---|
| विषयः - सर्वदर्शनम् | (CE-3.5.10) | गुणाः - ७० |
| दिनाङ्कः - १२/१२/२०१८ | ग्रन्थः ब्रह्मसूत्रशाङ्करभाष्यम्<br>प्रथमाध्यायस्य प्रथमः पादः | समयः -१०.०० तः ०१.०० |

### प्रथमान्वितिः

**प्रश्नः १ कयोश्चिद् द्वयोः सूत्रयोः यथाभाष्यं व्याख्यां लिखत । (१०)**

(१) ''अथातो ब्रह्म जिज्ञासा '' ।

(२) ''जन्माद्यस्य यतः '' ।

(३) ''शास्त्रयोनित्वात्'' ।

**प्रश्नः २ कस्यचिद् एकस्य यथाभाष्यं निबन्धात्मकम् उत्तरं लिखत । (१०)**

(१) युष्मदस्मत्प्रत्ययगोचरयोः विषयविषयिणोः कथम् अध्यासो भवति इति प्रतिपादयत ।

(२) ब्रह्मणः जगज्जन्मादिकारणत्वं विशदयत ।

### द्वितीयान्वितिः

**प्रश्नः ३ कयोश्चिद् द्वयोः सूत्रयोः यथाभाष्यं व्याख्यां लिखत । (१०)**

(१) ''तत्तु समन्वयात् '' ।

(२) ''गौणश्चेन्नात्मशब्दात्'' ।

(३) ''कामाच्च नानुमानापेक्षा'' ।

**प्रश्नः ४ कस्यचिद् एकस्य प्रश्नस्य निबन्धात्मकम् उत्तरं लिखत । (१०)**

(१) आनन्दमयाधिकरणस्य सारांशं लिखत ।

(२) वेदान्तवाक्यानाम् विधिशेषत्वं भाष्योक्तदिशा निराकुरुत ।

### तृतीयान्वितिः

**प्रश्नः ५ कयोश्चिद् द्वयोः सूत्रयोः यथाभाष्यं व्याख्यां लिखत । (१०)**

(१) ''अत एव प्राणः '' ।

(२) छन्दोभिधानान्नेति चेन्न तथा चेतोर्पणनिगदात् तथा हि दर्शनम् '' ।

(३) ''न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन् '' ।

**प्रश्नः ६ कस्यचिदेकस्य प्रश्नस्य निबन्धात्मकम् उत्तरं लिखत । (१०)**

(१) आकाशाधिकरणस्य सारांशं लिखत ।

(२) प्रतर्दनाधिकरणस्य सारांशं निबध्नीत ।

## चतुर्थान्वितिः

**प्रश्नः ७ केषाञ्चन दशानां प्रश्नानाम् अतिलघूत्तरात्मकम् उत्तरं लिखत ।** **( १० )**

(१) प्रथमाध्यायस्य प्रथमे पादे कति अधिकरणानि सन्ति ?

(२) शारीरकः इत्यस्य कः अर्थः ?

(३) हिरण्मयः पुरुषः कः ?

(४) को नाम अध्यासः ?

(५) नामरूपविकारभेदोपाधिविशिष्टं रूपं ब्रह्मणः कीदृशम् ?

(६) शारीरकमीमांसा कत्यध्यायात्मिका ?

(७) ''अथातो ब्रह्मजिज्ञासा'' इत्यत्र अतःशब्दार्थः कः ?

(८) यास्कमते कति भावविकाराः ?

(९) सर्वज्ञानाकरः कः ?

(१०) ब्रह्मविज्ञानस्य फलं किम् ?

(११) हिंसादिः प्रतिषेधचोदनालक्षणः कः ?

(१२) ''तन्निष्ठस्य मोक्षोपदेशात्'' इत्यत्र तच्छब्दवाच्यः कः ?

(१३) ''स्वाप्ययात्'' इत्यत्र स्वशब्दस्य कः अर्थः ?

(१४) यो हि अन्यान्  आनन्दयति सः कः ?

(१५) प्रधानं जगत्कारणम् इति कस्मिन् मते स्वीक्रियते ?